2021

# SANSKRIT

Paper : SANS - 101

(CBCS)

Full Marks : 40 Time : Two Hours

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers*
*in their own words as far as practicable.*

**Unit-1**

1. भवत: पाठ्यांशमनुसृत्य ऋग्वेदीयपुरुषसूक्तस्य विषयवस्तु समुपस्थाप्यताम् । 8

**अथवा,**

ऋग्वेदानुसारतः नासदीयसूक्तस्य दार्शनिकमहत्वं सविशदमालोच्यताम् ।

2. मन्त्रस्यैकस्य व्याख्या ऋषिच्छन्दोदेवतानिर्देशपुरःसरं **संस्कृतभाषया** कार्या - 4x1=4

(a) राजन्तमध्वराणां गोपामृतस्य दीदिविम् ।
वर्धमानं स्वे दमे ॥

(b) काले तपः काले ज्येष्ठं काले ब्रह्म समाहितम् ।
कालो ह सर्वस्येश्वरो यः पितासीत्प्रजापतेः ॥

3. यथेच्छमेकस्य विनियोगवाक्यस्य तात्पर्यं विलिख्यताम् । 3x1=3

(a) आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या ।

(b) अभिप्लवषडहस्य मध्यवर्तिषूक्थ्येषु तृतीयसवने मैत्रावरुणस्य 'अग्ने यं यज्ञम्' इत्यादिको वैकल्पिकोऽनुरूपस्तृचः।

(c) तत्रापि द्वितीयमन्त्रत्वेनोदाहृतत्वात् याज्यात्वम्।

**Unit-2**

4. के खलु पञ्चमहायज्ञाः ? शतपथब्राह्मणमनुसृत्य ब्रह्मयज्ञदेवयज्ञञ्च अधिकृत्य सविस्तरमालोच्यताम्। 10

**अथवा**

रोहितः कः ? पर्यटनकारिणः सखा कः ? शुनःशेपोपाख्यानमवलम्ब्य पर्यटनस्य गुरुत्वंमहत्वंच सविस्तरमालोच्यताम्।

5. यथेच्छं प्रश्न**पञ्चकं** संस्कृतभाषया समाधेयम्। - 1x5=5

(a) 'समाप्नोत्यहरहः स्वाहाकुर्यादाकाष्ठात्' इति कस्मिन् यज्ञविषये उक्तिरियम् ? अस्य मन्त्रस्य अर्थः स्पष्टीक्रियताम्।

(b) वषट्काराः कति ? के च ते ?

(c) 'स्वाध्याय' इतस्य शब्दस्य कोऽर्थः ?

(d) हरिश्चन्द्रस्य पितुर्नाम किम् ? हरिश्चन्द्रस्य कति पत्न्यः सन्ति ?

(e) हरिश्चन्द्रस्य गृहे कौ मुनी अवसताम् ?

(f) 'पुत्रो मे जायतां तेन त्वा यजा इति'- कस्य उक्तिरियम् ? अत्र 'त्वा' पदेन कः बोध्यते ?

(g) अजीगर्तस्य पिता कः ? अजीगर्तस्य कति पुत्राः आसन् ?

## Unit-3

6. प्रश्नद्वयोर्मध्ये एकस्य समाधानं कार्यम् । -

(a) अधोलिखितप्रश्नयोर्मध्ये **एकस्यो**त्तरं प्रदेयम् । 8

(i) तृतीयवरयाचनावसरे वरप्रदानात् पूर्वं यमकर्तृकप्रलोभनप्रदर्शनपर्वणि नचिकेता-यमयोर्मध्ये यः खलु वार्तालाप: प्रचलति, तदेव सविस्तरमालोचनीयम् ।

(ii) प्रेयस्-श्रेयसोविषये यमनचिकेता-संवादे यदालोचनं श्रुयते तद्विशद्यताम् ।

(b) अधोलिखितविषयचतुष्टयमध्ये कस्यचिद् **द्वयस्य** व्याख्या कार्या - 4x2=8

(i) कामस्याप्तिं जगतः प्रतिष्ठां
क्रतोरानन्त्यमभयस्य पारम् ।
स्तोममहदुरुगायं प्रतिष्ठां दृष्ट्वा
धृत्या धीरो नचिकेतोऽत्यस्राक्षीः ॥

(ii) अणोरणीयान्महतो महीया-
नात्माऽस्य जन्तोर्निहितो गुहायाम् ।
तमक्रतुः पश्यति वीतशोको
धातुप्रसादान्महिमानमात्मनः ॥

(iii) उत्तिष्ठत जाग्रत
प्राप्य वरान्निबोधत ।
क्षुरस्य धारा निशिता दुरत्यया
दुर्गं पथस्तत्कवयो वदन्ति ॥

(iv) मनसैवेदमाप्तव्यं नेह नानाऽस्ति किंचन ।
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥

7. यस्य कस्यचित् प्रश्न**द्वयस्य** संक्षिप्तोत्तरं संस्कृतभाषया प्रदातव्यम् । 2x1=2

(i) 'मृत्यवे त्वा ददामीति' इत्युक्तिः कस्य? किमर्थं स इदं कथितवान्?

(ii) 'देवैरत्रापि विचिकित्सितं पुरा'- कस्य उक्तिरियम् ? कस्मिन् विषये देवतानामपि सन्देहः अभवत् ?

(iii) 'श्वोभावा मर्त्यस्य यदन्तकैतत्' – अयं मन्त्रांश कठोपनिषदि कस्मिन् अध्याये कस्मिन् वा वल्ल्यां प्राप्यते ? अत्र 'अन्तकः' इति पदेन कः बोध्यते ?

(iv) 'अन्धेनैव नीयमाना यथान्धाः' – इति मन्त्रांशस्य तात्पर्यं स्पष्टीक्रियताम् ?